# अथुच्प्रत्ययः एकमवलोकनम्।

## 2.नन्दथुः।

(डा.वि.आर्.मनोज्, व्याख्याता, श्री चन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः, काञ्ची)

''भृशतापभृता मया भवान् मरुदासादि तुषारसारवान्।

धनिनामितरः सतां पुनर्गुणवत्सन्निधिरेव सन्निधिः।।'' इति। (2.53.नैषधम्।)

तथ्यमिदं यद्यपि सतां गुणवत्सन्निधिरेव सन्निधिरिति तथाप्यप्रस्तुतं खल्विदमेतर्हि ! न खलु किञ्चिदिहाप्रस्तुतम्। प्रकृतमेवानुसरामः। अथुच्प्रत्ययान्तशब्दा विचार्यन्ते। तत्रेयमवतारिका श्रीकृष्णपाण्डवयोः समागमवर्णनाप्रस्गादुद्धरिष्यमाणस्योदाहरणस्य। श्रूयतां माघस्य काव्यम्_

"सुतरां सुखेन सकलक्लमच्छिदा सनिदाघमङ्गमिव मातरिश्वना।

यदुनन्दनेन तदुदन्वतः पयः शशिनेव राजकुलमवाप नन्दथुम्।।" इति। (13.65.शिशुपालवधम्।) तद्राजकुलं = कुरुकुलं सकलदुःखापहारिणा यदुनन्दनेन श्रीकृष्णेन सुतरामत्यन्तं सुखेन नन्दथुमाप। कथमिव ? यथा आतपाक्लान्तमङ्गं मन्दमारुत (शीकर) स्पर्शेन सुखमनुभवति । अथवा यथा समुद्रजलं शशिना सुखमनुभवति (अत्र पूर्णचन्द्रोदये समुद्रजलवृद्धिर्लक्ष्यते , माघ एवैतत्सूचितं "पूर्णः चन्द्रोदयाकॉक्षी दृष्टान्तोऽत्र महार्णवः" इति। 2.31.शिशुपालवधम्।) तद्वन्नन्दथुमापेत्यर्थः। किमापेति ? 'नन्दथुम्' आप इति। समृद्धिम् आनन्दमाप । शर्म लेभे इत्यर्थः। तथा हि 'स्यादानन्दथुरानन्दः शर्मसातसुखानि च' इत्यमरः। एवं शूर्पणखायाः सीताग्रहणार्थं रावणप्रेरणवर्णनाप्रसङ्गे भट्टिः_

"सारोऽसाविन्द्रियार्थानां यस्यासौ तस्य नन्दथुः।" इति। (5.20.भट्टिकाव्यम्।)

असौ रामदयिता इन्द्रियार्थानां रूपसौन्दर्यादीनां सारो भवति। यस्येयं सहवर्तिनी तस्य परमानन्द इति भावः।

नन्दथुरित्यत्र "टुनदि समृद्धौ" (भ्वा.67) इति धातुः। अस्माद्धातोः "ट्वितोऽथुच्" (पा.सू.3.3.89) इति सूत्रेण अथुच्प्रत्ययः। धातोरनुबन्धवर्णलोपोत्तरं 'नद्' इति स्वरूपम्। प्रत्ययेऽपि 'अथु' इति स्वरूपम्। ट् उ (नद्) इ इति धातुगतवर्णेषु ट् उ इ इत्येते लुप्यन्ते।

धातुसम्बद्धः अन्त्यः इकारोऽत्र अनुबन्धो दृष्टः। यत्र अन्त्यः इकारः अनुबन्धः (सामान्यतः) तत्र 'नुम्' (न्) इत्यागमो भवति। क्व ? अन्त्यादचः (स्वरात्) परः। अत्र धातौ न् अ द् (नद्) इति संघातेऽन्त्योऽच् अकारः। ततः परं (स्वत एव दकारात्पूर्वमिति गम्यते) नुमागमः। ततो विभक्तिकार्यादिषु नन्दथुः इति जायते। **(2.नन्दथुः।)**

## **3.स्फूर्जथुः।**

*(डा. वि. आर्. मनोज्, व्याख्याता, श्री चन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः, काञ्ची)*

आदौ रामलक्ष्मणरहिते रहसि आश्रमात्सीतां रावणो जहार। तदनु वानरसैन्यसमेतो रामः युद्धे रावणं निर्जित्य सीतामादाय पुनरयोध्यां प्रत्यपद्यत। मध्येमार्गमनुभूतपूर्वान् दृष्टपूर्वान् चिरपरिचितॉश्च स्थावरान् जङ्गमॉश्च वर्णयन्तो रामादयः दण्डकारण्यमापुः। तथा च दण्डकाप्रत्यागमनवर्णनवेलायां रघुवंशे कालिदासः _

"वेलानिलाय प्रसृता भुजङ्गा महोर्मिविस्फूर्जथुनिर्विशेषाः।

सूर्यांशुसम्पर्कसमृद्धरागैर्व्यज्यन्त एते मणिभिः फणस्थैः।।" इति। (13.12.रघुवंशम्।)

इतीत्थं समुद्रतीरानिलं पातुमागताः भुजङ्गाः, कथम्भूताः इत्युक्तौ, महोर्मीणां यो विस्फूर्जथुरुद्रेकः तद्वद्दुर्ग्रहभेदाः भुजङ्गाः सूर्यांशुसम्पर्केण प्रवृद्धकान्तिभिः फणस्थैर्मणिभिर्व्यज्यन्त इति वर्णयति।

कः विशेषः ? अत्र वहोर्मिविस्फूर्जथुनिर्विशेषो विशेषः। विस्फूर्जथुः इति। कथम् ? अथुच्प्रत्ययान्तोऽयमपि शब्दः। 'स्फूर्जथुर्वज्रनिर्घोषे' इत्यमरः। 'टुओस्फूर्जा वज्रनिर्घोषे' (भ्वा.235) इति धातुः। अत्र 'स्फूर्ज्' इति धातुस्वरूपम्। इतरे वर्णास्त्वनुबन्धा एव। पूर्वोक्तवत्प्रक्रिया च ज्ञेया। 'वि' इत्युपसर्गयोगेनाऽयं शब्दोऽत्र प्रयुक्त इत्येव विशेषः। न खलु भुजङ्गाः विस्फूर्जथुप्रख्यं शब्दकारिणः। तथा चात्र दुर्ग्रहभेद्याः तीक्ष्णाः सर्पाः इति ध्वनितम्।

इदं तु प्रसिद्धं यन्महतां महिमा अन्यत्र तत्तुल्यगुणवद्भिरेव वस्तुभिर्वर्ण्यते इति।
"तुङ्गत्वमितरा नाद्रौ नेदं सिन्धावगाधता। अलङ्घनीयताहेतुरुभयं तन्मनस्विनि।।" इति।
**(2.48.**शिशुपालवधम्।)

अद्रेस्तुङ्गत्वं, सिन्धावगाधता, क्रूरो विधिः इत्यादयो लोके गुणगणनाप्रसङ्गे प्रचुरं प्रयुज्जते। किमिदमिदानीमलङ्कारचर्चा ? किं बहुना, प्रसङ्गे यत्स्मृतं तदुक्तम्। कः प्रसङ्गः? विस्फूर्जथुशब्दोऽथुच्प्रत्ययान्तः प्रकृतः। सीतापरित्यागकथावर्णनाप्रसङ्गे इदमेव कालिदासोऽपि करोति सीतामुखेन यत् सीतायाः परिदेवनं, स्वस्याः दुर्विधिमसह्यविस्फूर्जथुरिति।

वह्नौ विशुद्धामपि सीतां लोकापवादश्रवणात् रामोऽहासीत्। लक्ष्मणः खलु तत्कृत्यनिर्वहणाय रामेण नियुक्तः। स्थिरदुःखभाजमात्मानमेव पौनःपुन्येन निन्दन्तीं तामाश्वास्य वाल्मीकिनिकेतमार्गमाख्याय स्थितं नम्रशिरस्कं लक्ष्मणमुत्थाप्य, तं चिरजीविनमाशीर्भिरनुगृह्य आदौ रामाय संदिशति यत् 'वह्नौ विशुद्धामपि सीतां लोकापवादश्रवणात् रामोऽहासीत् तत् किं कुलस्य सदृशमि'ति। तदनु सा साध्वी अनपराधिनं राममाख्याय आत्मनो दुर्विधिमेव निन्दति_

"कल्याणबुद्धेरथवा तवायं न कामचारो मयि शङ्कनीयः।

ममैव जन्मान्तरपातकानां विपाकविस्फूर्जथुरप्रसह्यः।।" इति। **(14.62.**रघुवंशम्।)

अथवा न खलु स्वेच्छया मां जहासीः। ममैव जन्मान्तरपातकानामप्रसह्यो विपाकः, स एव विस्फूर्जथुरशनिनिर्घोषः इति। अत्र अप्रसह्यत्वातिरेकद्योतनाय विस्फूर्जथुशब्दः प्रयुक्तः। तदास्तां तत्र। उल्लसितस्पृहां सीतामवेक्ष्य रामो मृगरूपिणं मारीचमन्वधावत्। कृच्छ्रेण तमहनत्। म्रियमाणोऽसौ रावणवचः स्मृत्वा राघवस्येव सादृशं, 'हा सीते, लक्ष्मण...........' इत्यार्तस्वनं चकार। किमये ! मुहुर्मुहुरिदमेव कथामुखमुच्यते ? अये ! पौनरुक्त्यं मा स्म मन्वत। तर्हि किमर्थोयं प्रपञ्चः ? विस्फूर्जथुमुदाजिहीर्षामः, पद्यान्तरेण, भट्टिकाव्यात् _

"श्रुत्वा विस्फूर्जथुप्रख्यं निनादं परिदेविनी।

मत्वा कष्टाश्रितं रामं सौमित्रिं गन्तुमैजिहत्।।" इति। **(5.53.**भट्टिकाव्यम्।)

विस्फूर्जथुप्रख्यं = वज्रनिर्घोषसमं शब्दं (मारीचकृतम्) श्रुत्वा आपदग्रस्तं रामं मत्वा विलपन्ती सीता रामसहायार्थं लक्ष्मणं गन्तुमीहयाञ्चकारेति भावः। (3. स्फूर्जथुः।)